यत्र यस्य वा । अनेकप्रयोजनवति त्रि० "अनेकार्थाभियोगे च यावत्संसाधयेद्धनी" इति स्मृतिः । कर्म्म० । बहुप्रयोजने पु० ब०व० ।

**अनेकाश्रित** पु० अनेकेषु आश्रितः ७त० । वैशेषिकनये संयोगादिषु, सामान्येषु च । "संयोगश्च विभागश्च संख्या द्वित्वादिकास्तथा । द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः" इति भाषा० "नित्यत्वे सति अनेकसमवेतत्वं जातित्वमिति" मुक्ता० । एकस्या एव व्यक्तेर्नानाव्यक्तिनिष्ठत्वेऽस्य प्रयोगोपाधिता । भवन्ति च संयोगादयः सामान्यं च तथा । रूपादेर्नानाव्यक्तिषु सत्त्वेऽपि नैकव्यक्तेरिति न तस्य तथात्वमिति भेदः ।

**अनेजत्** न० न एजत् । सर्व्वदैकरूपे ब्रह्मणि । "अनेजदेकं मनसो जवीय" इति ईशोप० । "एजनं कम्पनं स्वभावप्रच्युतिस्तद्विवर्ज्जितं सर्व्वदा एकरूपमिति" भा० । कम्पनशून्ये त्रि० स्त्रियां ङीप् ।

**अनेडमूक** त्रि० एडो बधिरो मूको वाक्शक्तिरहितश्च नास्ति यस्मात् ५ ब० । (काला, बोबा) इति ख्याते श्रवणवचनशक्तिरहिते, शठे च । [प्रशस्ते प्रधाने निरुक्तकारः ।

**अनेद्य** त्रि० निदि कुत्सने क्यप् नि० नलोपगुणौ न०त० ।

**अनेनस्** त्रि० नास्ति व्यसनमधर्म्मो वा यस्य । व्यसनपापादिरहिते "राजा भवत्यनेनास्तु मुच्यन्ते च सभासदः" इति व्यव०त० मन्वादिस्मृ० । "अनेनो वोमरुतो याम" इति ऋ०६,६६,७ । "अनेनः पापरहितं यथा भवतीति" भाष्यम् "त्वानेना नमसा तुर" इति ७,८६,४ । "अनेना अपाप" इति भाष्यम् ।

**अनेमा** पु० नी—मनिन् न०त० । प्रशस्ये निरुक्तकारः ।

**अनेहस्** पु० न हन्यते हन—असि प्रकृतेरेहादेशः । काले । सौ अनङ् । अनेहा "कालोदिष्टोऽप्यनेहापी"त्यमरः । न हन्यते कर्म्मणि असि । अहिंसनीये त्रि० । "शम्भुवं मन्त्रं देवा अनेहसमिति" ऋ०१,४०,६ । "अनेहसं केनाप्यहिंस्यामिति" भा० । "पापिनोवयम् यजामहे सुप्रतूर्तिमनेहसम्" ऋ० १,४०,४ । "यथा नोऽस्मे जयाय धिषणे अनेहः" ऋ०६,५०३ ।

**अनैकाग्र्य** न० एकाग्रस्य भावः ष्यञ् अभावे न०त० । ऐकाग्र्याभावे । न०ब० । ऐकाग्र्यशून्ये त्रि० । "आचाराणामनैकाग्र्यं सर्वेषामुपलक्षणादिति" भाग० ।

**अनैकान्त** पु०अनेकान्तशब्दार्थे । तत्रैव व्युत्पत्तिर्दर्शिता "अनैकान्तो विरुद्धश्चेति" भाषा० पाठान्तरम् ।

**अनैकान्तिक** पु० एकान्तं नियतं व्याप्नोति एकान्त+ठक् एकान्तो नियमो व्याप्तिरस्त्यस्य ठन् स्वार्थे अण् वा न०त० । अनेकान्तशब्दार्थे अनेकान्तशब्देऽधिकं दृश्यम् "त्रिधाऽनैकान्तिको मत" भाषा० । ऐकान्तिको निश्चितरूपस्तद्भिन्ने त्रि० ।

**अनैक्य** न० न ऐक्यम् अभावे न०त० । ऐक्याभावे ।

**अनैतिह्य** त्रि० न ऐतिह्यं यत्र । परम्पराश्रवणरूपैतिह्यप्रमाणशून्ये । "अनागतमनैतिह्यं कथं ब्रह्माधिगच्छति" ? भा०शा०प० ।

**अ(आ)नैपुण** न० अनिपुणस्य भावः अण् आद्यचो वा वृद्धिः । अनिपुणत्वे । ष्यञ् अ(आ)नैपुण्यमप्यत्र न० ।

**अ(आ)नैश्वर्य्य** न० अनीश्वरस्य भावः आद्यचो वा वृद्धिः । अनीश्वरत्वे अधीनत्वे । नास्ति ऐश्वर्य्यं यस्य । अनैश्वर्य्यः ऐश्वर्य्यशून्ये त्रि० ।

**अनो** अव्य० न+नी—डो । अभावार्थे । "अभावे, नह्यनो नापी"त्यमरे अनो इत्येकं नामेति नीलकण्ठः । अन्ये तु अ इति, नो इति, च छित्त्वा नामद्वयमित्याहुः ।

**अनोकह** पु० अनसः शकटस्याकं गतिं हन्ति प्रतिरोधं करोति हन—ड ६त० । वृक्षे । "वृन्ताच्छ्लथं हरति पुष्पमनोकहानामिति" अनोकहाकम्पितपुष्पगन्धीति च" रघुः । "उद्यन्तमुद्द्रुतमनोकहजालमध्ये इति" माघः ।

**अनोदन** त्रि०नास्ति ओदनरूपं भक्ष्यं यत्र । "अन्नवर्जनयुक्ते व्रते । "नक्तं हविष्याद्ममनोदनं वा" इति स्मृतिः ।

**अनोङ्कृत** त्रि० न ओङ्कारमुच्चार्य्य कृतः ओम्+कृ—क्त न०त० । ओङ्कारोच्चारणाभावेन कृते । "ब्राह्मणः प्रणवं कुर्य्यादादावन्ते च सर्वदा । स्रवत्यनोङ्कृतं पूर्ब्बं परस्ताच्च विशीर्य्यति" मनुः । ओमिति स्वीकारे तथा कृतम् । अङ्गीकृते त्रि० ।

**अन्च** व्यक्तौ चु०उभ०सक० सेट् । अञ्चयति-ते आञ्चिचत्-त कर्म्मणि अञ्च्यते । णिजभावे अच्यते इति भेदः "पूर्व्वात् पूर्व्वमुदच्यते" इति श्रुतिः ।

**अन्चु** गतौ अचिवत् ८२ पृ० दृश्यम् ।

**अन्ज** गतौ कान्तौ म्रक्षणे व्यक्तौ च रुधा० वर्त्तमाने क्त अदित् वेट् पर० । अनक्ति । सिचि परस्मैपदे नित्यमिट् । आञ्जीत्-आनञ्ज । अञ्जिता-अङ्क्ता । अञ्जिष्यति—अङ्क्ष्यति । क्त अक्तः । क्तिन् अक्तिः । क्त्वा—अक्त्वा अञ्जित्वा । वि+प्रकाशने । व्यनक्ति व्यज्यते "व्यनक्ति कालत्रितयेऽपि योग्यतामिति" माघः । घञ् व्यङ्गः । ण्यत् व्यङ्ग्यः । "सव्यङ्ग्यमुत्तमं काव्यमिति" । णिच् । व्यञ्जयति ल्युट् । व्यञ्ज-